CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ अथ ॥

॥ शिवमहिम्न स्तोत्र ॥

॥ प्रारम्भः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ शिवमहिम्नःस्तोत्रम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri



CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीगणेशाय नमः॥ पुष्पदंत उवाच॥ महि
म्नःपारंते परमविदुषोयद्यसदृशीस्तुतिर्ब्र
ह्मादीनामपि तदवसन्नास्त्वयिगिरः॥ अ
थावाच्यःसर्वः स्वमतिपरिणामावधि गृण
न्ममाप्येषः स्तोत्रे हरनिरपवादः परिकरः
॥ १ ॥ अतीतःपंथानं तवच महिमा वाङ्
मनसयोरतद्व्यावृत्त्यायं चकितमभिधत्ते
श्रुतिरपि॥स कस्य स्तोतव्यः कतिविधगु
णःकस्य विषयःपदे त्वर्वाचीने पतति न म

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नः कस्यनवचः ॥२॥ मधुस्फीतावाचः प
रममृतं निर्मितवतस्तवब्रह्मन्किंवागपि
सुरगुरोर्विस्मयपदम् ॥ ममत्वेतांवाणीं गु
णकथनपुण्येन भवतः पुनामीत्यर्थेऽस्मि
न्पुरमथन बुद्धिर्व्यवसिता ॥३॥तवैश्वर्यंय
त्तज्जगदुदयरक्षाप्रलयकृत्त्रयीवस्तुव्यस्तं
तिसृषु गुणभिन्नासुतनुषु ॥ अभव्यानाम
स्मिन्वरदरमणीयामरमणींविहंतुं व्याक्रो
शींविदधतइहैकेजडधियः ॥ ४ ॥ किमीहः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

किंकायःस खलु किमुपायस्त्रिभुवनं किमा
धारो धाता सृजति किमुपादानइति च ॥
अतर्क्यैश्वर्येत्वय्यनवसरदुःस्थो हताधियः
कुतर्कोऽयंकांश्चिन्मुखरयतिमोहायजगतः
॥ ५ ॥ अजन्मानो लोकाः किमवयववंतो
ऽपि जगतामधिष्ठातारं किं भव विधिरना
दृत्य भवति ॥ अनीशो वा कुर्याद्भुवनजन
ने कः परिकरो यतोमंदास्त्वांप्रत्यमरवरसं
शेरतइमे॥६॥ त्रयीसांख्यंयोगःपशुपतिम

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तंवैष्णवमितिप्रभिन्नेप्रस्थानेपरमिदमदः
पथ्यमितिच ॥ रुचीनांवैचित्र्यादृजुकुटि
लनानापथजुषां नृणामेकोगम्यस्त्वमसि
पयसामर्णवइव ॥ ७ ॥ महोक्षः खट्वांगं पर
शुराजिनं भस्मफणिनःकपालं चेतीयत्तव
वरद तंत्रोपकरणम् ॥ सुरास्तांतामृद्धिं दध
तितुभवद्भूप्रणिहितां नहिस्वात्मारामं वि
षयमृगतृष्णा भ्रमयति॥८॥ध्रुवंकश्चित्सर्वं
सकलमपरस्त्वध्रुवमिदं परोध्रौव्याध्रौव्ये

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जगतिगदतिव्यस्तविषये॥ समस्तेऽप्येत
स्मिन्पुरमथन तैर्विस्मितइव स्तुवन्जिह्वे
मित्वांनखलुननुधृष्टामुखरता ॥९॥ तवैश्व
र्ययत्नाद्यदुपरि विरिंचो हरिरधःपरिच्छेत्तुं
यातावनलमनलस्कंधवपुषः ॥ततोभक्ति
श्रद्धाभरगुरुगृणद्भ्यां गिरिश यत्स्वयंतस्थे
ताभ्यांतवकिमनुवृत्तिर्नफलति १० अय
त्नादापाद्य त्रिभुवनमवैरव्यतिकरं दशा
स्योयद्बाहूनभृतरणकंडूपरवशान् ॥शिरःप

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ग्रश्रेणीरचितचरणाम्भोरुहबलेःस्थिराया
स्त्वद्भक्तेस्त्रिपुरहरविस्फूर्जितमिदम् ॥११
अमुष्य त्वत्सेवासमधिगतसारं भुजवनं ब
लात्कैलासेपि त्वदधिवसतौ विक्रमयतः।
अलभ्या पातालेऽप्यलसचलितागुष्ठशि
सिप्रतिष्ठा त्वय्यासीद्ध्रुवमुपचितो मुह्यति
खलः ॥१२॥ यद्दर्द्धिं सुत्राम्णोवरद परमो
च्चैरपिसतीमधश्चक्रे बाणः परिजनविधेय
स्त्रिभुवनः॥नतच्चित्रंतस्मिन् वरिवसितरि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वच्चरणयोर्न कस्याप्युन्नत्यै भवति शिरस
स्त्वय्यवनतिः ॥१३॥ अकांडब्रह्मांडक्षय
चकितदेवासुरकृपाविधेयस्यासीद्यस्त्रिन
यनविषंसंहृतवतः॥सकलमाषःकंठे तव न
कुरुते नःश्रियमहो विकारोऽपिश्लाघ्यो भु
वनभयभंगव्यसनिनः ॥१४॥ असिद्धार्था
नैव क्वचिदपि सदेवासुरनरेनिवर्तन्ते नित्यं
जगतिजयिनो यस्यविशिखाः॥सपश्यन्नी
शत्वामितरसुरसाधारणमभूत् स्मरःस्मर्त

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

व्यात्मा नहि वशिषुपथ्यःपरिभवः॥१५॥
मही पादाघाताद्व्रजतिसहसासंशयपदंप
दंविष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणम् ॥
मुहुर्द्यौर्दौस्थ्यं यात्यनिभृतजटाताडितत
टाजगद्रक्षायै त्वं नटसि ननु वामैव विभु
ता १६ वियद्व्यापीतारागणगुणितफेनो
द्गमरुचिः प्रवाहोवारांयःपृषतलघुदृष्टःशि
रसिते॥जगद्द्वीपाकारं जलधिवलयं तेनकृ
तमित्यनेनैवोन्नेयं धृतमहिम दिव्यं तव

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वपुः ॥१७॥ रथः क्षोणी यंता शतधृतिरगें
द्रो धनुरथो रथांगे चन्द्राका रथचरणपा
णिः शरइति॥दिधक्षोस्ते कोऽयं त्रिपुरतृण
माडंबरविधिर्विधेयैः क्रीडंत्यो न खलु पर
तंत्राः प्रभुधियः ॥ १८ ॥ हरिस्ते साहस्रं
कमलबलिमाधाय पदयोर्यदेकोने तस्मि
न्निजमुदहरन्नेत्रकमलम्॥गतोभक्त्युद्रेकः
परिणतिमसौ चक्रवपुषा त्रयाणां रक्षायै
त्रिपुरहर जागर्ति जगताम्॥१९॥क्रतौसुप्ते

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जाग्रत्त्वमसि फलयोगे क्रतुमतां क्व कर्म
प्रध्वस्तंफलति पुरुषाराधनमृते।अतस्त्वां
संप्रेक्ष्य क्रतुषु फलदानप्रतिभुवं श्रुतौश्र
द्धांबद्ध्वा दृढपरिकरः कर्मसु जनः २० क्रि
यादक्षोदक्षःक्रतुपतिरधीशस्तनुभृतामृषी
णामार्त्विज्यं शरणद सदस्याःसुरगणाः॥
क्रतुभ्रंशस्त्वत्तः क्रतुफलविधानव्यसनि
नोध्रुवंकर्तुःश्रद्धाविधुरमभिचाराय हि म
खाः२१प्रजानाथंनाथ प्रसभमभिकंस्वांदु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हितरं गतं रोहिद्भूतां रिरमयिषुमृष्यस्यवपु
षा ॥ धनुष्पाणेर्यातंदिवमपिसपत्राकृतम
मुं त्रसंतंतेऽद्यापित्यजतिनमृगव्याधरभ
सः।२२। स्वलावण्याशंसाधृतधनुषमह्नाय
तृणवत्पुरःप्लुष्टं दृष्ट्वा पुरमथन पुष्पायुधम
पि ॥यदिस्त्रैणंदेवीयमनिरतदेहार्धघटनाद
वैति त्वामद्धाबतवरदमुग्धायुवतयः २३॥
श्मशानेष्वाक्रीडा स्मरहरपिशाचाःसहच
राश्चिताभस्मालेपः स्त्रगपि नृकरोटीपरि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

करः॥अमंगल्यं शीलं तवभवतुनामैवम
खिलं तथापि स्मर्तॄणां वरदपरमं मंगलम
सि ॥२४॥ मनःप्रत्यक्चित्तेसविधमवधा
यात्तमरुतःप्रहृष्यद्रोमाणःप्रमदसलिलो
त्संगितदृशः॥यदालोक्याह्लादं हृदइव नि
मज्ज्यामृतमये दधत्यंतस्तत्त्वंकिमपि य
मिनस्तत्किलभवान् २५ त्वमर्कस्त्वं सोम
स्त्वमसिपवनस्त्वंहुतवहस्त्वमापस्त्वंव्यो
मत्वमुधरणिरात्मात्वमितिच॥परिच्छिन्ना

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मेवंत्वयिपरिणता बिभ्रतिगिरंनविद्मस्तत्त
त्त्वंवयमिह तु यत्त्वं न भवसि ॥२६॥ त्र
यींतिस्रोवृत्तीस्त्रिभुवनमथोत्रीनापि सुरान
काराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्णविकृति ॥
तुरीयंतेधाम ध्वनिभिरवरुंधानमणुभिःस
मस्तंव्यस्तंत्वांशरणदगृणात्योमितिपदम्
॥ २७ ॥ भवः शर्वो रुद्रः पशुपतिरथोग्रः
सहमहांस्तथाभीमेशानाविति यदभिधा
नाष्टकमिदम्,अमुष्मिन्प्रत्येकंप्रविचरति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

देव श्रुतिरपि प्रियायास्मैधाम्ने प्रणिहितन
मस्योस्मिभवते ॥२८॥ नमोनेदिष्ठायप्रि
यदवदविष्ठायचनमो नमः क्षोदिष्ठाय स्म
रहर महिष्ठाय च नमः॥नमोवर्षिष्ठा यत्रि
नयन यविष्ठायचनमो नमःसर्वस्मै ते त
दिदमितिशर्वायच नमः ॥२९॥ बहलरज
सेविश्वोत्पत्तौभवायनमोनमःप्रबलतमसे
तत्संहारे हराय नमोनमः ॥ जनसुखकृते
सत्त्वोद्रिक्तौमृडायनमोनमः प्रमहसिपदे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निस्त्रैगुण्ये शिवायनमोनमः ॥३०॥ कृशप
रिणतिचेतः क्लेशवश्यं क्वचेदं क्वचतवगुण
सीमोल्लंघिनीशश्वद्वद्धिः ॥ इतिचकितममं
दीकृत्य मां भक्तिराधाद्वरदचरणयोस्ते वा
क्यपुष्पोपहारम् ॥३१॥ असितगिरिसमं
स्यात्कज्जलं सिंधुपात्रेसुरतरुवरशाखा ले
खनीपत्रमुर्वी ॥ लिखतियदिगृहीत्वा शार
दासर्वकालं तदपि तव गुणानामीश पारं
नयाति॥३२॥ असुरसुरमुनींद्रैरर्चितस्येंदु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मौलेर्ग्रथितगुणमहिम्नोनिर्गुणस्येश्वरस्य।
सकलगणवरिष्ठःपुष्पदंताभिधानो रुचिर
मलघुवृत्तैः स्तोत्रमेतच्चकार ॥ ३३ ॥ अह
रहरनवद्यं धूर्जटेःस्तोत्रमेतत्पठतिपरमभ
क्त्या शुद्धचित्तःपुमान्यः ॥ सभवतिशिव
लोके रुद्रतुल्यस्तथात्र प्रचुरतरधनायुःपु
त्रवान्कीर्तिमांश्च ॥३४॥महेशान्नापरोदेवो
महिम्नोनापरास्तुतिः॥ अघोरान्नापरोमंत्रो
नास्ति तत्त्वंगुरोःपरम् ॥३५॥ दीक्षादान

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तपस्तीर्थंज्ञानंयागादिकाःक्रियाः॥महिम्न
स्तवपाठस्यकलांनार्हंतिषोडशीम् ३६ कु
सुमदशननामासर्वगंधर्वराजः शिशुशशि
धरमौलेर्देवदेवस्य दासः॥ सखलु निजम
हिम्नोभ्रष्टएवास्यरोषात्स्तवनमिदमकार्षी
द्दिव्यदिव्यं महिम्नः ॥३७॥ सुरवरमुनिपू
ज्यं स्वर्गमोक्षैकहेतुं पठति यदि मनुष्यः
प्राञ्जलिर्नान्यचेताः॥व्रजति शिवसमीपं
किन्नरैः स्तूयमानः स्तवनमिदममोघं पु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ष्पदंतप्रणीतम् ॥ ३८ ॥ श्रीपुष्पदंतमुख
पंकजनिर्गतेन स्तोत्रेण किल्बिषहरेणहर
प्रियेण ॥ कंठस्थितेनपठितेनसमाहितेन
सुप्रीणितो भवति भूतपतिर्महेशः ३९ इ
त्येषा वाङ्मयीपूजा श्रीमच्छंकरपादयोः।
अर्पिता तेन मेदेवः प्रीयतांच सदाशिवः
॥ ४० ॥ इति पुष्पदंतगंधर्वराजविरचितं
श्रीशिवमहिमाख्यस्तोत्रंसंपूर्णम् ॥ श्रीस
दाशिवार्पणमस्तु ॥ श्रीरस्तु ॥ ॥ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीगणेशायनमः ॥ अथ वेदसारशिवस्तोत्रप्रारम्भः ॥ पशूनां पतिं पापनाशं परेशं गजेंद्रस्य कृत्तिं वसानं वरेण्यम् ॥ जटाजूटमध्ये स्फुरद्गांगवारिं महादेवमेकं स्मरामि स्मरारिम् ॥ १ ॥ महेशं सुरेशं सुरारातिनाशं विभुं विश्वनाथं विभूत्यंगभूषम् ॥ विरूपाक्षमिंद्वर्कवह्नित्रिनेत्रं सदानंदमीडे प्रभुं पंचवक्त्रम् ॥ २ ॥ गिरीशं गणेशं गले नीलवर्णं गजेन्द्राधिरूढं गुणातीतरूपम् ॥ भवं भास्वरं भस्मना भूषितांगं भवानीकलत्रं भजे पंचवक्त्रम् ॥ ३ ॥ शिवाकांत शंभो शशांकार्धमौले महेशान शूलिञ्जटाजूटधारिन् ॥ त्वमेको जगद्व्यापको विश्वरूप प्रसीद प्रसीद प्रभो पूर्णरूप ॥ ४ ॥ परात्मानमेकं जगद्बीजमाद्यं निरीहं निराकारमोंकारवेद्यम् ॥ यतो जायते

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पाल्यते येन विश्वं तमीशं भजे लीयते यत्र विश्वम् ॥ ५ ॥ न भूमिर्न चापो न वह्निर्न वायुर्न चाकाशमास्ते न तंद्रा न निद्रा ॥ न ग्रीष्मो न शीतं न देशो न वेषो न यस्यास्ति मूर्तिस्त्रिमूर्तिं तमीडे ॥ ६ ॥ अजं शाश्वतं कारणं कारणानां शिवं केवलं भासकं भासकानाम् ॥ तुरीयं तमःपारमाद्यंतहीनं प्रपद्ये परं पावनं द्वैतहीनम् ॥ ७ ॥ नमस्ते नमस्ते विभो विश्वमूर्ते नमस्ते नमस्ते चिदानन्दमूर्ते ॥ नमस्ते नमस्ते तपोयोगगम्य नमस्ते नमस्ते श्रुतिज्ञानगम्य ॥ ८ ॥ प्रभो शूलपाणे विभो विश्वनाथ महादेव शंभो महेश त्रिनेत्र ॥ शिवाकांत शांत स्मरारे पुरारे त्वदन्यो वरेण्यो न मान्यो न गण्यः ॥ ९ ॥ शंभो महेश करुणामय

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शूलपाणे गौरीपते पशुपते पशुपाशनाशिन् ॥ काशी-
पते करुणया जगदेतदेकस्त्वं हंसि पासि विदधासि महेश्वरो
ऽसि ॥ १० ॥ त्वत्तो जगद्भवति देव भव स्मरारे त्वय्येव
तिष्ठति जगन्मृड विश्वनाथ ॥ त्वय्येव गच्छति लयं जगदे-
तदीश लिंगात्मके हर चराचरविश्वरूपिन् ॥ ११ ॥ ॥

इति श्रीमच्छङ्कराचार्यविरचितं वेदसारशिवस्तोत्रं संपूर्णम् ।

श्रीमच्छङ्करार्पणमस्तु ।

Printed by Manilal Itcharam Desai at
THE GUJARATI PRINTING PRESS
SASSOON BUILDINGS, CIRCLE, FORT, BOMBAY.
Published by Brijaballabh Hariprasad Kalbadevi Road,
Ramvadi-Bombay.

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इति शिवमहिम्नःस्तोत्रम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri